* P A U - 0 0 1 - 0 0 1 5 3 3 *

**PAU-001-001533** Seat No. ________

# B. A. (Sem. V) (CBCS) Examination

**October / November – 2018**

## Sanskrit : Paper-15

***(Sanskrit Bhasha Ane Sahitya)***

***(Old Course)***

**Faculty Code : 001**

**Subject Code : 001533**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

૧ નીચેનામાંથી કોઈપણ **બે** ગદ્ય ખંડોનો અનુવાદ કરો : **૧૪**

**1** Translate any **two** of the following passages : **14**

(१) तात चन्द्रापीड विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते न अल्पम् अपि उपदेष्टव्यम् अस्ति । केवलं च निसर्गतः एव अभानुभेद्यम् अरत्नालोकोच्छेद्यम् अप्रदीपप्रभापनेयम् अतिगहनम् तमः यौवनप्रभवम् । अपरिणामोपशमः दारुणः लक्ष्मीमदः । कष्टम् अनञ्जनवर्तिसाध्यम् अपरम् ऐश्वर्यतिमिरान्धत्वम् । अशिशिरोपचारहार्यः अत्यन्ततीव्रः दर्पदाहज्वरोष्मा ।

(२) अप्रत्ययबहुला च दिवसान्तकमलम् इव समुपचितमूलदण्डकोश मण्डलम् अपि मुञ्चति भूभुजम् । लता इव विटपकान् अध्यारोहति । गङ्गा इव वसुजननी अपि तरङ्गबुद्बुदचञ्चला, दिवसकरगतिः इव प्रकटितविविधसङ्क्रान्तिः, पातालगुहा इव तमोबहुला, हिडिम्बा इव भीमसाहसैकहार्यहृदया, प्रावृट् इव अचिरद्युतिकारिणी, दुष्टपिशाची इव दर्शितानेकपुरुषोच्छ्राया ।

(३) ग्रहैः इव गृह्यन्ते । भूतैः इव अभिभूयन्ते । मन्त्रैः इव आवेश्यन्ते । सत्त्वैः इव अवष्टभ्यन्ते । वायुना इव विडम्ब्यन्ते । पिशाचैः इव ग्रस्यन्ते । मदनशरैः मर्माभिहताः इव मुखभङ्गसहस्राणि कुर्वते । धनोष्मणा पच्यमानाः इव विचेष्टन्ते । गाढप्रहाराहताः इव अङ्गानि न धारयन्ति । कुलीरा इव तिर्यक् परिभ्रमन्ति । अधर्मभग्नगतयः पङ्गवः इव परेण सञ्चार्यन्ते ।

(४) इदम् एव च पुनः पुनः अभिधीयसे । विद्वांसम् अपि सचेतनम् अपि महासत्त्वम् अपि अभिजातम् अपि धीरम् अपि प्रयत्नवन्तम् अपि पुरुषम् इयम् दुर्विनीता खलीकरोति लक्ष्मीः इति । सर्वथा कल्याणैः पित्रा क्रियमाणम् अनुभवतु भवान् यौवराज्याभिषेकमङ्गलम् । कुलक्रमागताम् उद्वह पूर्वपुरूषैः ऊढाम् धुरम् ।

૨ નીચેનામાંથી કોઈપણ **ચાર** સંદર્ભ સહિત સમજાવો : **૧૪**

**2** Explain any **four** with reference to the context : **14**

(१) अयं च ते कालः प्रतापमारोपयितुम् ।

(२) कामं भवान् प्रकृत्यैव धीरः ।

(३) त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते ।

(४) तृष्णाविषमूर्च्छिताः कनकमयमिव सर्वं पश्यन्ति ।

(५) अमृतसहोदरापि कुटुकविपाका ।

(६) सरस्वतीपरिगृहीतमीर्ष्ययेव नालिङ्गति जनम् ।

(७) विरला हि तेषामुपदेष्टारः ।

(८) अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः ।

૩ નીચે આપેલ ફકરો વાંચી તેની નીચે આપેલા પ્રશ્નોના ઉત્તર સંસ્કૃતમાં લખો : **૧૪**

**3** Read the following passage and write in Sanskrit to the questions given below it : **14**

सञ्जीवनी नाम पौराणिकग्रन्थेषु प्राप्यमाणं बहुश्रुतम् चमत्कारि किञ्चन सस्यं, यस्मिन् पुनरुज्जीवनसामर्थ्यं वरीवर्ति । तस्य अस्तित्वविषये इदमित्थम् इति निर्णये असति अपि, तस्य प्रसिद्धिः तु आभारतं समस्ति । पौराणिकान्, भौगोलिकान्, वैद्यकीयान्, सस्यशास्त्रीयान् च सन्दर्भान् परिशील्प का नाम सञ्जीवनी इति कश्चन प्रयत्नः सचिन कठाळे–महोदयेन कृतः । ग्रन्थेषु विद्यमानानि वर्णनानि गृहीत्वा कः ओषधिः सञ्जीवन्या सादृश्यम् आवहेत् इति तेन आलोचितम् ।

(१) सञ्जीवन्यां कस्य सामर्थ्यं वरीवति ?

(२) कस्य प्रसिद्धिः आभारतम् समस्ति ?

(३) का नाम सञ्जीवनी इति कश्चन प्रयत्नः केन कृतः ?

(४) कांस्कान् सन्दर्भान् परिशीलितवान् संशोधकवर्यः ?

**અથવા/OR**

૩ નીચે આપેલ ફકરો વાંચી તેની નીચે આપેલા પ્રશ્નોના ઉત્તર સંસ્કૃતમાં લખો : **૧૪**

**3** Read the following passage and write in Sanskrit to the questions given below it : **14**

कालः कश्चन प्रवाहः इव । सः सर्वान् अपि अंशान् आत्मना सह नयति । मालिन्यमपि नयति, सम्पदमपि नयति । तुच्छमपि अपसारयति, मूल्यवत् अपि अपनयति । तस्य दृष्ट्या मूल्यांमूल्यभेदः तु अकिञ्चित्करः । अतः मूल्यवतः वस्तुनः संरक्षणाय अस्माभिः विशेषप्रयासः करणीयः भवति । कालप्रभावतः तस्य मूल्यवत्ता आवश्यकता वा विस्मृतिपथं यथा न गच्छेत् तथा प्रयासः विधेयः ।

(१) कः सर्वान् अंशान् आत्मना सह नयति ?

(२) कीदृशस्य वस्तुनः संरक्षणं करणीयम् ?

(३) कः कश्चन प्रवाहः इव ?

(४) कीदृशः प्रयासः विधेयः ?

૪ નીચે આપેલ પત્ર વિષયને અનુલક્ષીને સંસ્કૃતમાં પત્ર લખો : (કોઈપણ **એક**) **૧૪**

**4** Write a letter in Sanskrit on any **one** of the following Subjects : **14**

(१) महाविद्यालयेन आयोजितस्य प्रवासस्य वर्णनं लिखति विरागः स्वस्य पितृचरणं प्रति ।

(२) अभ्यासक्रमस्थानां निबन्धानां कृते मार्गदर्शनं वाञ्छति विरागः । अतः सः अध्यापकाय पत्रं लिखति ।

૫ નીચેનામાંથી કોઈપણ **એક** પર સંસ્કૃતમાં નિબંધ લખો : **૧૪**

**5** Write an essay in Sanskrit on any one of the following : **14**

(१) विधाधनं सर्वधनप्रधानम् ।

(२) धनमहिमा ।

(३) जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।

(४) वसन्तवर्णनम् ।

---